॥ हरिः ॐ ॥ श्री गुरुभ्यो नमः ॥
॥ श्री कृष्णाय नमः ॥

नारायणं सुरगुरुं जगदेकनाथं भक्तप्रियं सकललोकनमस्कृतं च ।
त्रैगुण्यवर्जितमजं विभुमाद्यमीशं वन्दे भवघ्नम् अमरासुरसिद्धवन्द्यम् ॥ १ ॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ २ ॥

वसुदेव सुतं देवं कंस चाणूर मर्दनम् ।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ ३ ॥

मनोजवम् मारुततुल्यवेगम् जितेन्द्रियम् बुद्धिमताम् वरिष्ठम् ।
वातात्मजम् वानरयूथमुख्यम् श्री राम दूतम् शिरसा नमामि ॥ ४ ॥

बुद्धिर् बलम् यशो धैर्यं निर्भयत्वमरोगता ।
अजाड्यं वाक्पटुत्वं च हनूमत् स्मरणाद्भवेत् ॥ ५ ॥

व्यासाय भव नाशाय श्रीशाय गुण राशये ।
हृद्याय शुद्ध विद्याय मध्वायच नमो नमः ॥ ६ ॥

पूज्याय राघवेन्द्राय सत्यधर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ॥ ७ ॥

दुर्वादि ध्वांतरवये वैष्णवेंदीवरेंदवे ।
श्रीराघवेंद्रगुरवे नमोत्यंतदयाळवे ॥ ८ ॥

श्री कृष्णपूजार्पित चित्तवृत्तिं विरक्तचूडामणि मिंदु शांतं ।
अनंत सद्भक्त प्रियं ममापि सुगुणेंद्रतीर्थं परमाश्रितोऽहं ॥९ ॥

-----०००००००-----

॥ हरिः ॐ ॥

सर्वोपनिषदो गावः दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥ १ ॥

एकं शास्त्रं देवकीपुत्र गीतं एको देवो देवकीपुत्र एव ।
एको मन्त्रस्तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा ॥ २ ॥

-----०००००००-----

यदक्षर पद भ्रष्टं मात्रा हीनं तु यद् भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोस्तुते ॥ १ ॥

विसर्ग बिन्दु मात्राणि पद पादाक्षराणि च ।
न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥ २ ॥

॥ ॐ अच्युताय नमः ॥ ॐ अनन्ताय नमः ॥ ॐ गोविन्दाय नमः ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ३ ॥
॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ हरिः ॐ ॥ श्री गुरुभ्यो नमः ॥ हरिः ॐ ॥
॥ श्री कृष्णार्पणमस्तु ॥

-----०००००००-----

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ ९-२२॥

With Blessings from:
Sri. Sri. Sugunendra Theertha Swamiji, Puthige Mutt, Udupi, India
Sri Krishna Vrundavana, NJ, USA
http://krishnavrunda.org/